कारकवादार्थः कारकव्याख्याया

१५७१

का॰ वा॰ १

ॐ श्रीगणेशाय नमः ॥ नत्वा शंभोः पदाम्भोजं नयपद्मः समासतः । करोति कारकव्याख्यामिह संख्यावतां मुदे ॥ कारका-
णि कर्तृकर्मकरणसंप्रदानापादानाधिकरणानि षट् । तत्त्वं च क्रियान्वयित्वम् । चैत्रः स्थाल्यां तण्डुलं पचतीत्यादौ सर्वापि
नि चैत्रादीनि व्याप्तः । अत्र मतिप्रकाशेन हारासंप्रदानादीनि च तण्डुलादि संपाद्य न हारासंबन्धिनापि पाकादिक्रिया-
निमित्तत्वात् । किं तु क्रियान्वितविभक्त्यर्थान्वितत्वम् । अस्ति च कर्त्रादीनामिति तृतीयाद्विभक्त्यर्थान्वयः । न च हारहतेः सं-
बन्धिनि षष्ठ्यर्थसंबन्धस्य तण्डुलादिनामार्थान्वितत्वात् क्रियायामनन्वितत्वात् । चैत्रस्य पचतीत्यादावपि तण्डुलादिपदाध्या-
हारेणैव बोधः । षष्ठ्यर्थसंबन्धस्य तण्डुलादिनामार्थ एव क्रियायाः कर्मत्वादिनैव साकाङ्क्षत्वात् । परस्पराकाङ्क्षाविरहा-
त् । गेहस्य भोक्ता चैत्रस्य पाकः स्थाल्याः कर्मत्वकर्तृत्वादिका षष्ठीकारकविभक्तिरेव कर्तृकर्मणोः कृतीति मतेन न
ह्यभानात् । अत एव संबन्धस्य न कारकत्वं क्रियायोगाभावादिति शाब्दिकाः । अत एव गृह विप्रतपस्विदुर्गतानां म-
नि कर्तृतीर्थमिव वस्तुमेव नैमिष्यादौ सालस्मीरुपक्रहनेययापरेषामिमादौ च रागे विपन्ने च सारिपदाध्याहारेणैव बो-
धः । यदि विनाध्याहारं षष्ठ्यर्थसंबन्धस्य क्रियायामन्वयः सामान्येन करणादिक्रियान्वितकर्तृत्वकर्मत्वादिषु उत्पन्नमा-
त्वादिनकारकत्वं बोध्यम् । अत एव चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् । केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ॥
मादौ निमित्तादेरपि न कारकत्वं । एतादृशपदपदार्थविभक्त्यादौ न कारकविभक्तयः । गां दोग्धि पयः । अजां ग्रामं न- गं
यतीत्यादौ गोग्रामयोः कर्मत्वमपि सत्त्वम् । अत्र हि द्विवचनस्य विभागानुकूलक्रियानुकूलव्यापारविशेषः कर्त्र । १

निष्ठोद्देश्यः वायुर्हते पर्णे रोगवतीति वारणाय द्वयवृत्त्येति देयम् संयोगानन्तरं तले रोगवती मयूरवारणाय विशेषणेति ।
विशेषोद्देश्यताप्रयोजनाभावः स्पन्दद्वयवृत्त्येति न देयं यत्र संयोगानुकूलक्रियानुकूलव्यापारस्ताद्दृशमनोधा ।
तोर्थः विभागजनकतावच्छेदकक्रियापदपदार्थस्यानन्वयात् गमयन्ति विभागानुकूलपद्यापृथक्क्रियानुकूलव्यापा ।
रानुकूलकृतिमानिति त्यजार्थः द्वितीयेन ग्रामपदस्य संयोगेनाधिकस्य क्रियायामित्यन्वयात् ग्रामं गच्छति सं
योगानुकूलस्पन्दनानुकूलक्रियानुकूलव्यापारानुकूलकृतिमानिति त्यजार्थः साक्षाद्धात्वर्थतावच्छेदकत्वं निरू ।
कक्रियारूपफलानन्वयित्वे सति परसमवेतत्वम् कर्मत्वम् नात्र स्पन्दक्रियारूपफलान्वयितावच्छेदकीभूतग्रामपदार्थो । ना
कर्मत्वम् उभयत्रापि धात्वर्थान्वयित्वविभक्त्यर्थान्वयित्वमस्ति फलद्वयस्यापि धात्वर्थावच्छेदकत्वात् अत एव
कर्मद्वयसाकाङ्क्षफलबोधकधातोर्द्विकर्मकत्वं स्वरूपादिस्म यत्र विभागानुकूलक्रियोद्देश्यः संयोगानुकूल
क्रियानयतेरर्थः नन्वनद्रमयानुकूलकर्तृव्यापारः कर्मद्वयस्यापि कर्तृफलेऽन्वयस्तत्र प्रयोज्यप्रयोजकः कर्मता
नुपपत्तेः परसमवेतत्वस्य क्रियायामभावात् कर्मद्वयस्यापि कर्तृफलेऽन्वये वगोलामुख्यव्यवहारो न स्यात् ।
एतेन विभागानुकूला कर्तृस्पन्दनानुकूलव्यापारादर्थ इत्यपास्तम् फलद्वयानन्वये गोलामुख्यव्यवहारानुपपत्तेः
यो द्विविभागविभागस्थानग्रामाद्यन्वयस्य वान्वेतीति गोलकर्मतालक्षणमिति तत्रापि न गोः पृथग्भूतेऽस्मादेशगोः क
र्मत्वस्योदाहरणपादत्वात् अन्ना ग्रामादिविषये ग्रामत्वस्याग्रतायामसत्त्वेनान्वयायोगात् काशीतः प्रयाग

का. नीयमानामजां ग्रामं नयतीति प्रयोगापत्तेश्च ॥ न च तत्तत्क्रियानुकूलकृतिमत्त्वं तत्तत्क्रियाकर्तृत्वम् २।
वा. काष्ठादेः पाकाद्यनुकूलव्यापारवत्त्वप्रतिसन्धानेऽपि कर्तृपदाप्रयोगात् कृताकृतविभागादिना सिद्धयत्नशक्ति।
२ केन कृपात्वनात्वयेन न सिद्धस्य कर्तृपदस्य यत्नाश्रयबोधकत्वाच्च अचेतनेऽपि कर्तृपदप्रयोगस्तु गौणः गुरुत
रथोरत्वेनालनादिक्रियाविषयकयत्नसत्त्वेऽपि तन्निक्रियायाश्च निष्पत्तौ तन्निक्रियाकर्तृत्वाव्यवहारात् विषय
त्वं विहाय अनुकूलत्वस्य पात्रम् परित्वमङ्गीभूतेनैतन्मयाकृतमिति व्यवहारेण तत्तादृशीयकृतिसाध्यस्यापि
धर्मस्य स्वप्राकरभोजनस्य न कर्तृत्वेन तद्विषयत्वमपि निवेशनम् तत्साध्यत्वेन तेन यागादिकृते तदृष्टे ऽपते
न स्वर्गादिविषयकत्वेऽपि न यागादिकर्तुः स्वर्गकर्तृत्वे न कर्तृत्वेन तद्विषयत्वमपि निवेशनम् तत्साध्यत्वम् अस्म
दादिकर्तृकयागादिकर्तृत्वमीश्वरस्येष्टम् तथापि तण्डुलानामीशः पचतीति प्रयोगोऽपीष्ट एव न चैवं कार्यत्वा
नवच्छिन्नजन्यतानिरूपितत्वमसाधारण्येन निवेशनीयमिति नैयायिकाः वैयाकरणास्तु तत्त्वमिति तत्कर्तृत्वं स्वानु
कूलसन्ताऽऽरेचतनेऽपि कर्तृपदप्रयोगात् क्रियाश्रयत्वमेव कर्तृत्वम् कारककर्मादिपरत्वन्तरूपान्तरपाठ्यक्रियार्थ
कत्वाश्रयत्वमिहाख्यातार्थः तथाच्यपद्यसमभिव्याहृताख्यातेन पदार्थत्वयोऽस्मिन्पदार्थत्वं बोध्यते।
तद्धात्वर्थनिरूपितत्वर्धर्मवत्त्वं तद्धात्वर्थकर्तृत्वम् यथा पचतीत्यादौ पाकानुकूलव्यापारवत्त्वम् जानाती। गं
त्यादौ ज्ञानाश्रयत्वम् नश्यतीत्यादौ नाशप्रतियोगित्वम् चैत्रेण तण्डुलः पच्यत इत्यादौ पाकजन्यफलाश्रय। २

त्ववारणाय यथा गाय समभिव्याहृतेति अत्रैव चैत्रादेः कर्तृत्वं न पचतीत्याख्यातवाच्यपक्षे स्मार्तायैवेति केचिदप्यम् पा
तथा त्वितद्वितीयार्थकर्मत्वकरणत्वमात्याख्यातेनेति नानानीत्याख्यातार्थस्यात्रयत्वेन पाककर्तृ।
त्वेहनीयादौ हिंसाश्रयत्वेन गमनकर्तृत्वमिमित्तसंतप्रयत्नरितिधात्वर्थविशेषणं यदिदं वक्राष्टं पचतिस्था
लीपचतीत्यादि प्रयोगवद्धात्वर्थकरणादीनां कर्तृत्वमिष्टं तदापद्यतेऽरतः स्वयमेव मादौ कर्मकर्तृकर्मणोपि त
रिष्ठ अरतः स्वयंपचतीत्यप्रयोगस्त्वसाधुत्वात् कर्मख्यातयगादिनेदविभावने चैत्रो मैत्रं ग्रामं गमयतीत्य।
मादावपि मैत्रादेः कर्तृत्वमिष्टमेव अत्र गमनानुकूलोद्धापारोऽणिजर्थः नरत्तु कूलव्यापारस्याख्यातस
नत्वेणिजर्थव्यापारस्यापि गकृतीत्याख्यातार्थत्वात् अत्र तु कूलकृतिमत्त्वस्याप्यत्र सत्त्वाद्य यदिवणिजर्थ
व्यापारमेवत्रमिमृष्यतानायः तथा तेधात्वर्थव्यापारस्यनेत्रनिष्ठत्वमेत्रस्य कर्तृत्वानापत्तेः ग्रामहतिस्ययागा।
नुकूलमेवत्रवृत्तिक्रियानुकूलव्यापाराश्रयत्वं वाच्यं स्मनवयवोयः तथा च गमयतीत्यत्र द्वितीयार्थत्वहतिसत्वक
त्वेपि मैत्रस्य कर्तृत्वमप्रयत्नहूमितिकिमाख्यातपदेनतिविभावने कर्मत्वत्वविशिष्टस्य कर्तृत्वरूपतावारणा।
यत्तदुपादेयम् नहि कर्मत्वादेकर्तृत्वरूपत्वेः न भिद्दि तेकर्तरीत्यनुशासनार्थः सकर्मकेत्युमादुः तत्रश्चैवतनेका।
भिमुक्तानां स्वरसतः कर्तृपरामप्रयोगात् यत्नसत्वेत्रः कर्तृत्वेतिपाणिनिसूत्रात्कारकात्तराप्रयोज्यत्वे सतिका।
रकांतरप्रयोजकत्वं कर्तृत्वम् सतत्वेन तद्रूपारिजत्वसंयोगानुकूलव्यापारवत्वरूपतत्प्रयोज्यत्ववत्वकाष्ठादेरवु

का॰
वा॰
२

दासः तत्र ईश्वरप्रयोज्यानां जीवानां कर्तृत्वानापत्तेः दंडजन्यसंयोगानुकूलव्यापारवत्त्वनिष्ठत्वालान्वयव्याप्तिनिष्ठे।
निरिक्तं कर्मत्वं न करणव्यापारित्वम् न हि करणजन्यव्यापारवत्त्वं दात्रलवानन्वयत्वात् नानीमार्टे हस्तादिकरण
व्यापारवत्त्वनिरासात्रातिव्याप्तम् नापि परसमवेतक्रियाजन्यफलशालित्वम् गमिपतोः कर्मत्वस्य ईश्वरसि
द्धेः स्पन्दः पूर्वापरयोः प्रसंगात् नदीवर्द्धेतत्र स्पन्दे हेतुरवयवोपचयपूर्णत्वात् परपरयोः तीरप्राप्तिरूपफ।
लस्याश्रयेतीरे कर्मत्वप्राप्तिश्च तीरे चेत्स्वत्ववदिति धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वम् नाहश्यवचफ।
लं गमेः संयोगास्तत्र विभागः पतेरधः संयोगास्तस्य किन्तु स्पन्दप्रवृत्तिः स्पन्दमात्रे तेषामेकत्र पर्यायत्वा
पत्तेः स्पन्दे ह्यथा तोऽप्रफलानवच्छिन्नव्यापारे शक्तिरिति कोऽपि तद्वेषः फलावच्छिन्नव्यापारबोधकत्वादेव धातूनां
सकर्मकत्वव्यवहारोपपत्तेः ज्ञानादीनां नामार्थान्वितत्वाहृश्यत्वातिरिक्तविषयितासंबन्धेन विभक्त्यर्थान्वयधर्मकत्वं गम्य।
लं सकर्मकत्वम् घटं जानातीत्यादिना घटविषयिताशालिज्ञानाश्रयत्वलाभात्तन्नबोधः नाहश्यधातुयोग एव तु
कर्मप्रत्ययः अतएव भुंक्ते तण्डुलं भोजनतायत्नते इति प्रयोगात् यत्नधात्वर्थे नामार्थान्वितस्य तण्डुलाश्रयत्वे हेतुत्वस्य
वान्वयान्वयतः सकर्मकत्वं न वा भोजनं यतते इति प्रयोगः भूमिं प्रयाति विहगो विजहाति महीरुहं न स्तां नाना
मिति प्रयोगात् स्वस्य धात्वर्थावच्छेदकसंयोगविभागरूपफलशालित्वेऽपि कर्माभावात् परसमवेतक्रियाजन्यतम
विधात्वर्थावच्छेदकफलेऽतिव्याप्तम् नचैवमपि मज्जो मज्जं गच्छतीत्यादावुभयकर्मसंयोगरूपफलस्य नाहश्यनानस्

गो॰
२

कर्तृककियाकर्मत्वं तत्र पञ्चमव्यवहारः स्वभिन्नस्येति परसमवेतक्रियाजन्यतादृशफलशालित्वं यत्र तत्र कर्मत्वस्य लोका-
नां त्यजंश्च द्वितीयादेः क्रियान्वयिपरसमवेतत्वमर्थः । परत्वस्य प्रकृत्यर्थापेक्षया तु पास्यार्थफलान्वयापेक्षया कर्मी-
च त्वोतन्न स्वाश्रये तथा च भूमिं गच्छत्यत्र चैककर्मात्मतस्यान्ते फलवत्परसमवेतत्वं वाच्यतार्थः । भूमिपदार्थस्य पर-
त्वविशेषणत्वेन फलप्रतिविशेष्यत्वेन चान्वयः । तथा च भूमिभिन्नसमवेतक्रियाजन्यफलशालिनी भूमिरित्यन्वय-
बोधः । भूमिं प्रयाति मैत्रो भूमिभिन्नसमवेतभूमिवृत्तिसंयोगजनकस्पन्दाश्रयत्वे कृतिमानित्यन्वयबोधः । एवं च
स्वभिन्नसमवेतस्ववृत्तिसंयोगजनकयत्नज्ञानवृत्तिगमनेन तत्र कृतिमत्त्वस्य स्वाभिन्नभावादेव न मन्त्र-
स्वं गच्छतीति प्रयोगः । तत्र परत्वस्य प्रकृत्यर्थस्यान्वयितावच्छेदकावच्छिन्नप्रतियोगिकत्वेन प्रतियोगितामात्रे-
णान्वयः । नाद्यः पृथिवीं प्रयाति विहग इत्यादावनुपपत्तेः । खगस्य पृथिवीत्वावच्छिन्नत्वान्न द्वितीयः । स्वात्मन्य-
पि खगपृथिव्युभयभेदसत्त्वात् स्वं प्रयाति मैत्र इतिवत् द्वितीयार्थफले यद्धर्मेणान्वयस्तद्धर्मावच्छिन्नत्वावच्छिन्नप्र-
तियोगिताकत्वसंबन्धेन प्रकृत्यर्थस्य कर्माख्यातार्थफलान्वयित्वस्य परत्वेनान्वयात् । इत्थं च पृथिवीं प्रयातीत्यादौ
तत्पृथिवीव्यक्तिवृत्तिसंयोगजनकत्वं प्रयाणस्य तद्व्यक्तिभिन्नत्वं विहगस्येति न दोषः । एवं तु पृथिवीं विमातैरेह-
थिवीपदं कर्मभूतत्वतत्पृथिवीव्यक्तिपरम् एवमन्यत्र कर्मवाचकसामान्यपदलक्षणया विशेषपरम् इत्थं चान्वयि-
तावच्छेदकावच्छिन्नप्रतियोगितायास्तादृग्व्यक्तेर्न भङ्ग इत्याहुः । यत्तु परसमवेतत्वं नार्थः किन्तु स्वान्याभावप्र

का॰
वा॰
४

नियोगितावच्छेदकत्वं क्रियान्वयि द्वितीयार्थः तथा च भूमिवृत्तिसंयोगजनकभूमिनिष्ठान्योन्याभावप्रतियोगि।
तावच्छेदकप्रयागानुकूलकृतिमानिति वाक्यार्थः स्ववृत्तिक्रियायाः स्वनिष्ठान्योन्याभावप्रतियोगितानवच्छे
दकत्वान्न स्वप्रयागेऽतिप्रसंग इति न च तथापि येन मल्लेन मल्लांतरं न गतं सोपि मल्लो मल्लं गच्छतीति प्रयोगापत्तेः
मल्लांतरनिष्ठभेदप्रतियोगितावच्छेदिकायास्तन्मल्लवृत्तिक्रियायास्तन्मल्लवृत्तिभूमिसंयोगजनकत्वात् यन्मल्ल
वृक्षः फलान्वयस्तस्याप्यन्योन्याभावादेः त्वयोक्तदोषवारणेन तद्व्यक्तित्वादेः प्रकारत्वे कर्मवाचकपदस्य तद्व्यक्ति
त्वावच्छिन्नलक्षणस्वीकारे युगपद्वृत्तिद्वयविरोधप्रसंगः न च नान्योन्याभावप्रतियोगितावच्छेदकत्वं क्रियान्व
यि द्वितीयार्थः तथापरसमवेतत्वम् समवेतत्वं च स्वरूपसामान्यधर्मावच्छिन्नतत्कर्मसमवेतत्वादिप्रति।
योगिताकाभावात्मकस्वप्रतियोगिकाभावसंबंधेन कर्मवाचकपदार्थान्वितद्वितीयार्थो समवेतत्वस्य क्रियाया
मन्वयस्वीकारात् सामान्यरूपेणावोधकतया युगपद्वृत्तिद्वयविरोध इति चेन्न तथा नये क्रियायाश्चाव्याप्यवृत्तिता।
यात्निष्ठतया अयद्रव्यसमवेतत्वस्याव्याप्यवृत्तित्वात् मल्लस्य गच्छतीति प्रयोगप्रसंगस्य दुर्वारत्वापत्तेः एतेन त
तत्क्रियान्वयिकारणत्वे सति तत्तत्क्रियावच्छेदकफलशालित्वं तत्तत्क्रियाकर्मत्वम् द्वितीयादेरपि तत्तत्क्रियान्वयिका
रणत्वमर्थ इत्यपास्तम् सामान्यरूपेण विशेषाभावानभ्युपगमे यद्व्यक्तौ द्वितीयार्थो समवेतत्वं तद्व्यक्तिसमवे। गं ४
तत्वावच्छिन्नप्रतियोगिताकाभावात्मकस्वप्रतियोगिकाभावसंबन्धेन कर्मवाचकपदार्थान्वितद्वितीयार्थो स।

यत्तु परसमवेतत्वं नार्थः किं त्वन्योन्याभावप्रतियोगितावच्छेदकत्वं क्रियान्वयिद्वितीयार्थः तथा च भूमिवृ
त्तिसंयोगजनकभूमिनिष्ठान्योन्याभावप्रतियोगितावच्छेदकप्रयाणानुकूलकृतिमानिति वाक्यार्थः स्ववृ
त्तिक्रियायाः स्वनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वान्न संप्रयातीति प्रयोग इति तन्न तथापि येन मल्ले
न मल्लान्तरं नगतेऽसोऽपि मल्लो मल्लं गच्छतीति प्रयोगापत्तेः मल्लान्तरनिष्ठभेदप्रतियोगितावच्छेदिकायास्तन्मल्ल
वृत्तिक्रियायास्तन्मल्लवृत्तिभूमिसंयोगजनकत्वात् यन्मल्लव्यक्तेः फलान्वयस्तस्या एवान्योन्याभावेऽन्वयोक्तौ
दोषवारणेऽन्तु तद्व्यक्तित्वादेः प्रकारत्वेन कर्मवाचकपदस्य तद्व्यक्तित्वावच्छिन्नलक्षणास्वीकारे युगपद्वृत्तिद्वय
विरोधप्रसंगः ननु नैन्योन्याभावप्रतियोगितावच्छेदकत्वं क्रियान्वयिद्वितीयार्थः तवापरसमवेतत्वम् समवेत
त्वस्वरूपसामान्यधर्मावच्छिन्नतन्निरूपकमेसमवेतत्वनिष्ठप्रतियोगिताकाभावात्मकस्वप्रतियोगिकाभावसंबं
धेन कर्मवाचकपदार्थान्वितद्वितीयार्थसमवेतत्वस्य क्रियायामन्वयस्वीकारात् सामान्यरूपेण विशेषाभावा
नभ्युपगमे यद्व्यक्तौ द्वितीयार्थसमवेतत्वन्वयस्तद्व्यक्तिसमवेतत्वावच्छिन्नप्रतियोगिताकाभावात्मकस्वप्र
तियोगिकाभावसंबन्धेन कर्मवाचकपदार्थान्वितद्वितीयार्थसमवेतत्वस्य यथान्वयं क्रियायामन्वयस्वीकारात्
क्वाप्यदृष्टचरत्वेऽपि प्रकृते गमनेन रविरहेणास्वीकारात् अतएव न कर्मवाचकपदस्य तत्तद्व्यक्तित्वेन तत्तद्व्यक्तिबोध
कतया सामान्यरूपेणाबोधकतया युगपद्वृत्तिद्वयविरोधः इति चैत्रेन मल्लेन यं क्रियाया अव्याप्यवृत्तितया तन्निष्ठ

मल्लादिपदं शक्त्या मल्लत्वादिना मल्लादिकं बोधयति लक्षणया तत्तद्व्यक्तिमात्रं बोधयति मे याच मल्लवृत्तिसंयोगजनक तन्मल्लव्यक्तिवृत्त्यन्योन्याभावप्रतियोगितावच्छेदकगमनानुकूलकृतिमानिति मल्लो मल्लं गच्छतीत्यस्य बोधो भवेत् ९ =

आश्रयतासंसर्गेणेति शेषः ८ =

लक्षणां च तत्कर्मव्यक्तिसमवेतत्वत्वावच्छिन्नप्रतियोगिताकाभावविशिष्टक्रियाजनकतथात्वर्थत्वावच्छेदकफलशालित्वं कर्मत्वम् २ =

एतन्मते च भूमिं प्रयातीत्यत्र भूमिवृत्तिसंयोगानुकूलभूम्यसमवेतक्रियाजनककृतिमानिति बोधः १ =

फलान्वयित्वं जनकतायाः परसमवेतत्वान्वयित्वं चाश्रयत्वेन क्रियायां बोध्यम् ४८

का॰वा॰ ४ तदाश्रयत्वं समवेतत्वस्याव्याप्यवृत्तित्वात् मल्लः स्वं गच्छतीति प्रयोगप्रसंगात् स्वदुर्वारत्वापत्तेः एतेन तत्तत्क्रि
यानधिकरणत्वे सति तत्तत्क्रियावच्छेदकफलशालित्वं तत्तत्क्रियाकर्मत्वम् द्वितीयादेरपि तत्तत्क्रियानधिक
रणत्वमर्थः इत्यपास्तम् शाब्दानुभवानापत्तेश्च यत्तत्क्रियान्वयिपरसमवेतत्वमपेक्ष्य कर्तृत्वान्वयिपरत्वमेव लाघवात् कर्मप्रत्य
यार्थ इति तत्र द्वितीयाद्यर्थे फलपरसमवेतत्वयोरेकान्वयित्वेन लाघवात् ग्रामो गमेः कर्मेति तच्चैत्रं प्रत्याद्यपरसमवेत स्प ४
क्रियाजन्यत्वघटितमेव कर्मपदार्थतया तमेव कर्मप्रत्ययार्थत्वात् गच्छति ग्रामः स्वयमित्यादौ परत्वान्वयिविरहाच्चेति दि
क् अथैवमपि पतेरधःसंयोगावच्छिन्नस्पन्दार्थकतया धात्वर्थतावच्छेदकफलशालितो भूतलादेः कर्मत्वेः वृक्षात् भूमिं
तले पततीति प्रयोगः स्यादिति चेत् तथाविवक्षायां भवत्येव अत एव द्वितीयाश्रितेति सूत्रे पतितेन शब्दयोगे द्वितीया
समासविधाने नरकं पतित इत्युदाहरणं च नरकं पतितो नरकपतित इति साधु संगच्छते कश्चित्तमम्पि साधुर्यथा भूमौ पतति
ग्रामं गच्छतीत्यादौ धात्वनुकूलत्वादेः कर्मत्वेऽपि न द्वितीया यत्र फलस्याधेयत्वेन शाब्दनिर्णयाउपस्थितत्वेन तत्संबन्धाकाङ्क्षा
तथाहि कर्त्रभिन्नान्वयिफलावच्छिन्नव्यापारबोधकस्य धातोः सकर्मकत्वे तत्त्वपतेरधःसंयोगरूपफलस्य पर्णानि
तत्वात् अथ इत्यस्य स्वसंबन्धिसाकाङ्क्षतया संबन्धित्वेन पर्णादिस्यैवान्वयात् भूतले पर्णादिस्याधः तत्त्वपर्णं भूतलस्थितिनभूत
ले पततीति प्रयोगः इति अथ कथं वृक्षाद्भूमिं पर्णमधः पततीति प्रयोगः इति चेत् भ्रमात् तथा विवक्षायां गतेति रश्मी
नमनुरूपार्थे इत्यत्र व्यक्तिविशेषस्याधोभागे पततीत्यर्थात् दोषः स्यात् यत्तु सजिगम्यादेः स्पन्दाद्यात्मकव्या॰
फलसंबन्धाकाङ्क्षात्तैवतन्न्वीकारात् अतः ५ ४

पारमात्रे शक्तिः फलस्य द्वितीयादिलभ्यत्वात् अत एव ग्रामे गच्छति त्यजतीत्यनयोर्नैकार्थता त्यजिगम्योर्योगे द्वि
तीयादिना विभागसंयोगबोधनात् त्यजेर्विभागावच्छिन्नस्पन्दशालित्वस्य गमेः संयोगावच्छिन्नस्पन्दशालित्वस्य का
र्यतावच्छेदकत्वात् अत एव गमनेस्माद्गमनयोरपि नैकार्थता उक्तकार्यकारणभावानुरोधेनापि त्यजिगम्यो
र्विभागसंयोगावच्छिन्नस्पन्दलक्षणाङ्गीकारात् विभागाद्यवच्छिन्नस्पन्दशालित्वे च विभागादिस्पन्दोभयवैशि
ष्ट्यावगाहिशालित्वम् तेनैव चैत्रेण ग्राममत्यजतस्तस्मादेवाकाशे जन्यस्पन्दविशेषणकविभागादिविशिष्टकशा
लित्वेऽधःसङ्ग्रहः इत्थं च परसमवेतधात्वर्थजनितफलविशेषशालित्वं तद्धात्वर्थकर्मत्वम् तेन त्यजनादेर्नान्तरदेशादेक
र्मत्वमिति तन्न विभागाद्यवच्छिन्नस्पन्दशालित्वस्य त्यजनावच्छेदकत्वे तादृशस्पन्दे शक्तेरीदृशत्वात् परिशेषमितरा
न्वितशक्तिग्रहे इतरांशे च विभागाद्यंशस्य त्यागेनानुक्तेः त्यागगमनयोरेकार्थतावारणाय तत्तत्फलविशिष्टस्पन्दे
शक्तिसिद्धेर्विनापि तल्लक्षणामतिप्रसङ्गानेनत्याग्रनीतेरिति दिक् एवं ददातेर्मूलग्रहणं विना स्वस्वत्वध्वंसपरस्वत्व
जनकत्यागः यजतेर्देवतोद्देश्यकस्वस्वत्वध्वंसफलकत्यागः जुहोतेस्तादृशाग्निमत्पश्चाद्यर्थः अत एव जुहोतिर्जा
तादृशत्यागाभावेपि होतृत्वम् अग्निमत्पश्चाद्यग्निसंयोगानुकूलक्रियानुकूलहस्तनादिनोदनादिव्यापारः नचैव
मग्नौ जुहोतीत्यादौ सप्तम्यर्थस्याग्निसंयोगस्यान्वये निराकाङ्क्षत्वे निवाच्यम् अग्निसंयोगानुकूलक्रियानुकूलव्यापा
रस्यैव धात्वर्थत्वात् न च तथाप्यग्नेः कर्मतापत्तिः संयोगस्य धात्वर्थतानवच्छेदकतया तद्धात्वग्नेः कर्मताभावा
त् क्रियाया एव धात्वर्थतावच्छेदकतया तदाश्रयस्यैव होतव्यस्यैव कर्मत्वात् द्वितीयार्थश्च वृत्तित्वम् तच्च धात्वर्थताव

ब्रूतं

चेटकेऽन्वेति रथ्येच विप्राय गोदानमिति विक्रये यजनेऽक्षेदोऽतिरस्यादौ मूल्यग्रहणं विना विप्रोद्देशपूर्वकं गोदानमिति स
स्वत्वध्वंसपरस्वत्वफलकत्यागानुकूलकृतिमानित्यन्वयबोधः हेतुत्वमग्रिमेयोगात् किन्त्वक्रियानुकूलव्यापारा
नुकूलकृतिमानित्यन्वयबोधः विप्रोद्देशपूर्वकं गवां स्वत्वध्वंसपरस्वत्वफलकत्यागेन विप्रोद्देशक
स्वस्वत्वध्वंसफलकत्यागानुकूलकृतिमानित्यन्वयबोधः एवं मूल्यग्रहणप्रयुक्तस्वस्वत्वध्वंसफलकत्यागो
विक्रियाः मूल्यदानप्रयुक्तस्वस्वत्वोत्पादकस्वीकारः क्रयः दानजन्यपरस्वत्वजनकस्वीकारः प्रतिग्रहः तथा
च गां विक्रीणाति गां क्रीणाति गां प्रतिगृह्णातीत्यादौ गां इति मूल्यग्रहणप्रयुक्तस्वस्वत्वध्वंसफलकत्यागानुकू
लकृतिमान् गोऽनुकूलमूल्यदानप्रयुक्तस्वस्वत्वानुकूलस्वीकारानुकूलकृतिमान् गोऽनुकूलदानजन्यस्वस्वत्वज
नकस्वीकारानुकूलकृतिमानिति क्रमेणान्वयधीरिति सम्प्रदायः इदमत्राभिधेयम् दानस्य परस्वत्वजनक
त्वेन तत एव विक्रियवारणे मूल्यग्रहणं विनेति व्यर्थम् अथ प्रतिग्रह एव स्वीकारविशेषतया स्वत्वहेतुः अस्वामिके
स्वीकारस्य स्वत्वहेतुत्वाकल्पनात् अतएव याजनाध्यापनप्रतिग्रहैर्ब्राह्मणो धनमर्जयेदित्यादिके साधुसङ्गच्छते
अन्यथा प्रतिग्रहवैफल्यापत्तेः दानेन तु स्वत्वध्वंसमात्रं जन्यते परस्वत्वप्रयोजकमिति मतेनैवायं हेयं इत्यर्थम् न तु
पादानेऽनुपेत्याया मतित्व्याप्तेः तस्यापि स्वत्वध्वंसद्वारा परस्वत्वजनकत्वात् तद्वारणाय वैजात्यं सोपादानस्या
वश्यकत्वात् वस्तुतो हरस्येयं पात्रमुद्दिश्य त्यक्तद्रव्यस्य प्रतिग्रहात्प्रागस्वामिकस्यानुद्देश्येन गृहीतस्य प्रतिग्रहात्स्व
त्वे स्यादिति अमोद्देश्यकत्वादेः प्रतिबन्धकत्वे गौरवम् न चलादेशस्यागोदानाभासः एवमस्यसम्प्रदानको हि त्यागो ५

वैजात्यं चोपेत्यायजेन्यादिस्वत्वेयसद्वारेण परस्वत्वप्रयोजकत्वम् = १
वैजात्यं चोपेत्याविक्रियाजन्यत्वम् १

5

अहंग्रहीष्यामीत्याकारकः प्रतिग्रहप्रागभावः ३

दानम् सम्प्रदानत्वे च ददस्वेत्यनुमतिप्रकाशनद्वारा दानक्रियादौ हेतुत्वेन न चासन्निहितस्य तत्त्वमिति ततो दातुः
स्वत्वनाश इति वाच्यम् तीर्थे सङ्कल्पिते यद्यद्द्रव्यं न प्रतीपन्ने दाता तीर्थफलं भुङ्क्ते प्रतिग्राही न दोषभाक् १ मनसा
पात्रमुद्दिश्य भूमौ तोयं विनिःक्षिपेत् विद्यते सागरस्यान्तो दानस्यान्तो न विद्यते २ इति वाक्यात् तादृशदानसिद्धेश्च तस्मा
द्दानमेव परस्वत्वजनकम् प्रतिग्रहप्रागभावस्यापेक्षणीयत्वात् न प्रतिग्रहवैफल्यम् अत एव यस्मै दत्तं तेन तस्याप्रति दानस्य परस्वत्वजनक
ग्रहे नैव दातुः स्वत्वनिवृत्तिः अस्तु वा तत्र द्रव्यस्य स्वीकाररूपप्रतिग्रहत्वेन स्वीकर्तृत्वं दानत्वेन वा निर्विनिगमकाभा त्वप्रयोजकत्वे वेत्यर्थः ४१
वाद्दाने स्वस्वत्वध्वंसद्वारा परस्वत्वप्रयोजकत्वम् प्रतिग्रहस्य च स्वस्वत्वजनकः उभयथापि मूल्यग्रहणं विनेतिपर्यन्तम् वि
क्रयस्य परस्वत्वजनकत्वे मानाभावात् न च विक्रीतद्रव्यस्वीकाररूपक्रयत्वेन स्वीकर्तृत्वं द्रव्यविक्रयत्वेन वा विक्रय
त्वम् इत्यत्रापि विनिगमनाविरहः मूल्यदानपूर्वकस्वीकारस्यैव क्रयत्वात् विक्रयत्वस्य गौरवेणानिवेशात् किञ्च
स्वस्वत्वध्वंसजनकेत्यपि व्यर्थम् अव्यावर्तकत्वात् अपि चाग्निप्रक्षेपो होम इत्यप्ययुक्तम् देवतोद्देश्यकस्वस्वत्वध्वंसफ
लकत्यागो यागः स एव प्रक्षेपावच्छिन्नो होम इति वाचस्पतिमिश्राद्युक्तेः याग एव विशिष्टदेशप्रक्षेपोपहितो होम
इति विविकोक्तेश्च अस्तु च स्मृतिजो यागाद्यजमानस्वस्वत्वध्वंसोऽनुमतः देशमात्रात् विदेशस्थस्वामिस्वत्वध्वंसव
त् वस्तुतस्तु दानत्वयागत्वहोमत्वादयो मानसप्रत्यक्षगम्या जातिविशेषाः न च श्राद्धस्यापि प्रक्षेपाभावाद्यागत्वं ब्राह्म
णापेक्षया दानत्वमिति विवेकोक्तेः तयोस्तादृग्यौगजातित्वमिति वाच्यम् श्राद्धस्य गौणत्वेनोभयरूपत्वात् वस्तुतः श्रा
द्धस्य यागत्वमेवोद्देश्यपित्रादिस्वत्वाजनकत्वात् ब्राह्मणस्य स्वत्वमपि न सार्वत्रिकम् ब्राह्मणाभावेऽपि श्राद्धोक्तेः पिण्ड

इक्षात्वव्याप्या ३

का. वा. ६

6

स्वगोऽजविप्रेभ्यस्तारिनान्यत्रापितत्स्यनिपतेः विसंजयत इत्यादौ द्वितीयार्थेऽप्युद्देश्यत्वम् तत्वं च तत्संप्रदानमित्यादिनाऽनवि
षयत्वम् देवतायाः स्वत्वोपगमेन यागतद्दानत्वाप्यत्र होमत्वयागत्वाप्यमिति तत्सर्वं सिद्धम् देवस्वत्वादिकमपि
यागएवेतिकृत्वमप्रकृतेन अतएव संसृष्टत्वं साधारणस्वत्वस्वत्वनाशोत्तरं साधारणस्वत्वोत्पादात् तत्र सकलविशेष
णामहितदानलक्षणातिव्याप्तिरित्यपास्तम् दानत्वजातेस्तत्राभावात् परमावस्वत्वानुकूलत्वविशेषणात्संसृ(
ष्टिनिरासः इत्यन्ये तत्र न स्वत्वनाशः किन्तु परस्वत्वोत्पत्तिमात्रम् न च स्वस्वत्ववति परस्वत्वानुपपत्तिः तेनैकाया
उत्तेजकत्वादिति स्वस्वत्वध्वंसस्यैकत्वविशेषणादेव तन्निरासः इत्यन्ये परेतु इष्टविशेषजनकत्वविशेषणान्न दा
नातिरिक्ताद्रुः एतेन विनिमयविक्रयलक्षणातिव्याप्तिरित्यपास्तम् विक्रयत्वादेर्जातित्वात् मूल्यातिरिक्तद्रव्य
ग्रहणप्रयुक्तस्वस्वत्वध्वंसपरस्वत्वानुकूलत्यागो विनिमयः इत्यन्ये इत्यलमतिविस्तरेण किमत्र स्वत्वमिति चेत् अ
त्र प्राचीनाः यथेष्टविनियोज्यत्वं स्वत्वम् न च शास्त्रानिषिद्धविनियोगोपायोपायः क्रयप्रतिग्रहादिस्तद्विषयत्वम् त
च्चन बहिरिन्द्रियवेद्यम् प्रतिग्रहादेर्मानसज्ञानविशेषस्य बहिरिन्द्रियायोगपत्वादित्याहुः नव्यास्तु प्रतिग्रहादि
नाशोत्तरमपि स्वत्वव्यवहारप्रामाण्यानुरोधात् स्वत्वमतिरिक्त एव पदार्थः न च स्वत्वं दानादिनोत्पत्तिप्रतिग्रहादित
स्य स्वत्वमुत्पद्यते तच्च बहिरिन्द्रिययोग्यत्वे परपक्षमीति प्रतीतेस्तदीययथेष्टविनियोज्यत्वज्ञानस्य तदीयस्वत्वसाक्षा
त्कारहेतुत्वात् न यथेष्टविनियोगाज्ञानदशायां स्वत्वसाक्षात्कारापत्तिः वस्तुतस्तदीययथेष्टविनियोज्यत्वे तदी
यस्वत्वव्यभिचारित्वग्रहदशायां तद्ग्रहेऽपि स्वत्वसाक्षात्कारानुदयात् तदीयस्वत्वसाक्षात्कारे प्रति तदीयस्वत्वव्याप्यतदी

स्वत्वस्य बहिरिन्द्रिययोग्यत्वे पुरुषस्य तत्र स्वात्मन्यग्रणविनियोज्यत्वाज्ञानदशायामपि पुरुषान्तरस्य तदीयस्वत्वसाक्षात्कारापत्तिरित्यत आहुः तदीयेति ३॥
तदीययथेष्टविनियोज्यत्वग्रहे प्रत्यर्थः ९

९

स्वस्वत्वप्रतिबन्धकपरस्वत्वोत्प
त्तिप्रयोजकस्वत्वसाधारण(
स्वत्वोत्कर्षरूपोत्तेजकत्वेन
प्रतिबन्धकीभूतरिसोहिस
तेऽपिसिसाधयिषानुयो
त्तेजकत्वादनुमितेरिव: ५

विनियोज्यत्वं नाम विनि
योगविषयत्वम् विनियो
गपदं च तल्लक्षणया स्वोपा
यपरम् ८

यथा चेष्टविनियोज्यत्ववदिदमित्याकारकत्वानस्पदेहत्वमेवाचम् तथाच स्वतस्मात्तुमितिरेवनतुसाक्षात्कारः स्वतेः

लौकिकविषयताकल्पनेलौकिकविषयिताशालिनसाक्षात्कारेतादृशविशेषदर्शनस्यहेतुकल्पनेचगौरवात् सं — नद्वीयसत्वग्राप्यन्तद्वी

पश्यामीत्यनुव्यवसायस्यत्वदभिचन्दनंपश्यामीत्यादिवद्विशेषणांशेलौकिकप्रत्यक्षविषयतावगाही नचायोग्यत्व — यथचेष्टविनियो

कल्पनेलौकिकसाक्षात्कारेसत्वस्यप्रतिबन्धकत्वकल्पनेचगौरवमितिवाच्यम् तस्यायोग्यत्वकल्पनेलौकिकविषय — ज्यत्ववदिदमित्याका

ताविरहादेवतत्प्रत्यक्षत्वावारणासम्भवात् योग्यत्वेतत्र्चलौकिकप्रत्यक्षसामग्र्यास्तत्त्वाच्चरानुमित्यादौप्रतिबन्धकत्व — रकस्य; २

कल्पनेगौरवादित्याहुः तच्चकर्मत्रिविधम् प्राप्यंविकार्यंनिर्वर्त्यंच तत्रसंयोगादिक्रियाजन्यफलशालिप्राप्यम् यथा

ग्रामंगच्छतीत्यादौग्रामादि यत्तुप्रसिद्धाकर्मवाचस्यांतरमापद्यतेतद्विकार्यम् यथाकाष्ठंभस्मकरोतिसुवर्णंकुण्ड

लंकरोतीत्यादौकाष्ठादिपलदस्यकाष्ठावयवादेःसतएवभस्मादिमन्यरूपावस्थान्तरप्राप्तेः यत्तुक्रियायत्कर्मेना

शाकंफलंजनयतितद्विकार्यम् यथाकाष्ठंलुनातीत्यत्रकाष्ठमितितत्रकाष्ठपदलक्ष्यस्यकाष्ठावयवस्यकर्मतयाकि

यायालुनाशकत्वासम्भवात् अवहिकाष्ठपदस्यकाष्ठावयवोलुनातेरारम्भकसंयोगप्रतिद्वन्द्विविभागहेतुक्रिया

नुकूलव्यापारोर्थः तथाचकाष्ठावयवतन्मारम्भकसंयोगप्रतिद्वन्द्विविभागजनकक्रियाजनकव्यापारानुकूलकृ

तिमानितिसमन्वयबोधः काष्ठावयवस्यप्राप्यकर्मत्वेनैवावस्थान्तरमापन्नाभावान्नविकार्यता तण्डुलंपचतीत्यादौतण्डुलप

दलक्ष्यतण्डुलावयवः पच्यर्थोरूपादिपरावृत्तिस्तदवच्छिन्नाविक्लित्तिस्तदवच्छिन्नोवातेजःसंयोगः तथाचधात्वर्थजन्यफल

शालितात्सतोवस्थान्तरमापन्नत्वोभयसत्वाद्विपकर्मत्वेतण्डुलावयवस्येष्टम् असत्कीर्तिस्यात्तत्कर्ममेवमेतदोषः यत्क्रिय

प्राप्यविकार्ययोरसत्कीर्तिस्यात्तत्प्राप्यग्रामंग
च्छतिसुवर्णंकुण्डलंकरोतीत्यादिः १

का॰वा॰
१८

यानिष्पाद्यत्वेन तन्निर्वर्त्यम् यथा घटं करोतीत्यादौ घटादि अथ कृञः फलावच्छिन्नव्यापारबोधकत्वाभावाद्धा
त्वर्थकर्मत्वम् न त्वसाध्यताख्यकृतिविषयत्वम् अत एव वीरणं करोतीत्यादिने प्रयोगः वीरणादावुपादानताख्यविष
यताया एव सत्वात् यत्तु कटादिपदस्य कटाद्यवयवे निरूढलक्षणा तत्र विना लक्षणां कटादेः कर्मत्वसम्भवेऽपि का
रकत्वासम्भवात् निरूढलक्षणायास्तु मुख्यप्रयोगापवादकत्वाच्च न वीरणं करोतीति मुख्यप्रयोगइति तन्न घटं जाना
तिप्रतीतमित्यादौ घटादेरिव कटादेरपि गौणकारकत्वसम्भवात् स्तोकं पचतीत्यादौ क्रियाविशेषणपदोत्तरद्विती
याविशेषणविभक्तिवत्प्रयोगसाधुत्वाय नामार्थधात्वर्थयोरभेदान्वयस्वीकारेणाभेदस्य संसर्गत्वात् तदस्वीकारे
विशेषणविभक्तिवद्वस्तुसाभेदार्थिका तस्य कारकत्वाभावस्तु क्रियान्वितकर्तृत्वाद्यन्वितत्वाभावादिति दिक् कर
णत्वं कारकान्तराचरितार्थत्वे सति क्रियाहेतुत्वम् कारकान्तरनिष्ठव्यापारद्वारा क्रियाहेतुत्वाभावः समवेतार्थः क
र्तृकारके आरम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वकुठारादिक्रियायाप्यवच्छिदाधानव्यर्थतया कर्तुः कुठारादिकर
णनिष्ठव्यापारद्वाराच्छिदादिहेतुत्वान्नातिप्रसङ्गः कर्मणस्तु न तादृशक्रियाहेतुत्वं विरहादेव नातिप्रसङ्गः अधिकरण
मधिकर्तृकर्मान्यतरव्यापारद्वारा क्रियाहेतुः यथा गृहे स्थाल्यामोदनं पचतीत्यादौ गृहस्थाल्याद्यधिकरणं कर्तृकर्मसं
योगद्वारा पाकादिक्रियासाधनम् सम्प्रदानं स्वानुमतिप्रकाशनेन कर्तुरिच्छाद्वारा दाननिमित्तम् अपादानं पतनप्रतिब
न्धकसंयोगनाशकपत्रादिविभागद्वारा पतनादिनिमित्तमिति नातिप्रसङ्गः न चैवं कुठारादिकरणस्यापि कर्तृनिष्ठव्यापा
रस्यापेक्षत्वादसम्भवः कारकान्तरनिष्ठव्यापारसम्बन्धावच्छिन्नजनकत्वाभावस्य समवेतार्थतया कुठारादिक्रियारूप।

क्रियादिक्रियायोऽकर्तारस्यतादात्म्यसम्बन्धेनदेवदत्तपाकर्तेनिष्ठव्यापारसम्बन्धेनाहेतुत्वात् नचकर्तृकर्मणोरभिव्याप्ते
तिव्याप्तिः तस्याप्येतन्मतेलक्ष्यत्वात् अतएवफलायोगव्यवच्छिन्नंकारणंकरणमितिवदन्ति वस्तुतस्तुव्यापारवत्वेस
तिकारणत्वंकरणत्वम् नचैवंकार्यमात्रेकालादेरदृष्टस्यमनोयोगस्यचव्यापारस्यसत्वात् आत्मनोपिकरणत्वापत्तिरिष्ट
त्वात् उपधेयसङ्करेपिकर्तृत्वकरणत्वलक्षणोपाधेरसङ्करात् व्यवहारभेदोपपत्तेः इयंचानुमितौव्याप्तिज्ञानंकरणम् प
रामर्शस्यव्यापारत्वात् चाक्षुषादौचक्षुरादिकरणंसंयोगस्यव्यापारस्यसत्वात् श्रावणज्ञानेश्रोत्रम् मनःश्रोत्रसंयोगस्यव्या
पारस्यसत्वात् नतुशब्दस्यशब्दाभावप्रत्यक्षेतस्यव्यभिचारात् परेतुफलानुकूलकर्तृव्यापारवत्वंकरणत्वम् अस्तिचकु
ठारादेश्छिदाद्यनुकूलकर्तृसंयोगादिमत्वम् नचगृहस्याल्पाद्यधिकरणस्यापिकर्तृव्यापारवत्वात्करणत्वापत्तिरिष्ट
त्वात् स्थाल्यात्रंसाधयतिगवाद्यन्नंसाधयति ग्रासेणनदात्रेसाधयतीत्यादिप्रयोगात्तत्रापितदिष्टम् चैत्रात्मनाचैत्रेण
वापचतीत्यप्रयोगात् कर्तृःशरीरस्यचवारणायद्रव्यसमवायिभिन्नत्वेनक्रियानुकूलकृतिमतोभिन्नत्वेनविशेषणम् कृ
तिमत्वेसमवायेनावच्छेदकतयाचतेनशरीरस्यापिव्युदासः भिन्नेत्यनेनहस्तादिसङ्ग्रहः हस्तादिनाछिनत्तीतिप्रयो
गात् व्यापारवत्वंजनकतयानेनव्याप्तिस्मरणादिसाधारणमित्याहुः अत्रपरशुनाछिनत्तीत्यादौनिरूपककर्तृकर
णत्वंतृतीयार्थः आश्रयत्वेनप्रकृत्यर्थान्वितस्यतस्यधात्वर्थेनिरूपकत्वेनान्वयः तथाचपरशुनिष्ठकरणतानिरूपक
छिदानुकूलकृतिमानितिवाक्यार्थः इतियात्रेः नव्यास्तुपरशुनाछिनत्तिनदात्रेणलुनातीत्यादौकर्तृत्वान्वयानुरोधेननिरू
पककरणतानिरूपितजनकतासम्बन्धवत्तृतीयार्थः तस्यचनिरूपकत्वेनप्रकृत्यर्थान्वितस्याश्रयतयाधात्वर्थेन्वयः इयं

देवदत्तोव्याप्तिस्मरणाद्वह्नि
मनुमिनोतीत्यत्रदेवदत्त
जन्यपरामर्शरूपव्यापा
रजनकंव्याप्तिस्मरणादि ४

द्रव्यसमवायिभिन्नसमवायावच्छेदकतोभयसम्बन्धावच्छिन्नतत्क्रियानुकूलकृतिनिरूपिताधिकर
णतावच्छिन्नत्वेसतिजनकतासम्बन्धेनफलानुकूलकर्तृव्यापारवत्वंकरणत्वमितिफलितोर्थः = ४

तथाचतन्मते परम्परानिरूपितजन्यत्ववन्निरूपितजन्यत्वाभावो भयमुखक्रियादानुकूलक्षणस्याव्याप्तिरिति बोध्यम् १

जटाभिस्तापसत्वव्याप्यत्वानवच्छेदकत्व
तविशिष्टतापसत्वव्याप्यत्वसमानाधिक
रणत्वं यत्तत्त्वानिताप
सत्त्वं वास्तापसः १

का·वा·
८

चपरम्परानिरूपितजन्यत्वं तदाननिरूपितजन्यत्वाभावस्तु क्रियायामन्वेतीत्याहुः जटाभिस्तापसस्त्यादौ तृतीयोपलक्षणे तत्त्वं च
अतद्व्याप्यत्वानवच्छेदकत्वे सत्यतद्व्याप्यतिसमानाधिकरणत्वम् अस्ति च जटानां तापसव्याप्यत्वानवच्छेदकत्वं शमादिमत्त्व
८ स्यैव तन्न्यूनानतिरिक्तवृत्तितया तदवच्छेदकत्वात् शमादिना तापसस्य प्रयोगोऽविवक्षातः तथा प्रयोगस्येष्टत्वे तु विशे
षणोपलक्षणसाधारणवैशिष्ट्यमेव तृतीयार्थः अक्ष्णा काणः पादेन खञ्जः इत्यादौ येनाङ्गविकार इति सूत्रेण तृती
या येनाङ्गेनाङ्गिनो विकारो हानिराधिक्यं वा तद्वाचकात् तृतीयेति सूत्रार्थः एवं च तृतीयायाः प्रमितमर्थः तत्त्वं च
निर्विकल्पकाणादिपदार्थस्यैकदेशे विकारे तेन काणत्वं च वहिरवच्छेदेन चक्षुः प्रमगोलकवत्त्वम् ज्ञानमात्रान्य
स्याकाणत्वं तु चक्षुष्पगोलकवत्त्वे सतीति वाच्यम् यदि च वहिरवच्छेदेन चक्षुः सत्वेऽप्युपघातादेव न चाक्षुषं तदा
उपहतगोलकवत्त्वमेव काणत्वम् अक्षिपदं च चक्षुष्पगोलकपरम् तथा च तादृशगोलकवृत्तियत्नक्षमत्वमुपहतगो
वा तद्विशिष्टगोलकवानित्यक्ष्णा काण इत्यस्यार्थः एवं च खञ्जत्वं संस्थानविशेषसम्बन्धपदत्वम् तथा च पदवृत्तियत्न
तथाविधसंस्थानसम्बन्धत्वेन विशिष्टवानिति पादेन खञ्ज इत्यस्यार्थः मुखेन त्रिलोचनत्रयवानिति मुखेन त्रिलोचन इ
त्यस्यार्थः परेतु अक्ष्णा काण इत्यादावभेदे तृतीया तथा च तादृशगोलकाभिन्नैकचक्षुः सम्बन्धोपहततद्वान् हानिनिवा
कार्थः एवं मुखेन त्रिलोचन इत्यत्र त्रिलोचनत्रयविशिष्टवत्परम् तथा च मुखाभिन्नलोचनत्रयविशिष्टवानित्यर्थ इ
त्याहुः धनेन कुलमित्यादौ हेतुत्वे तृतीया क्रियान्वयिनिरुक्तकरणत्वाद्याधिकात् तृतीया कर्तृकरणयोस्तृतीयेत्यने
नविहिता हेतावित्यनेन सूत्रेण तु नामार्थान्वयिनि हेत्वर्थे के निविशेषः पुत्रेण सहागतः पिता इत्यादौ तृतीयायाः क ८
अपिता क्रियायामपि

रेत्वमर्थः सहशब्दसमभिव्याहृतयात्वर्थः सहशब्दार्थः एकधर्म्मादिरूपैर्देशावच्छेदेनैककालीनत्वसम्बन्धेनतस्स
समभिव्याहृतक्रियायामन्वयः तथाचपुत्रकर्तृकागमनसमानधर्म्मरूपसमानदेशसमानकालीनागमनकर्तृत्वस
र्थः शिष्येणसहगुरुर्ब्राह्मणः पुत्रेणसहपितास्पन्दतइत्यादौसहार्थोब्राह्मणत्वादिः समानकालीनत्वसम्बन्धेनब्रा
ह्मणत्वादिपदार्थैकदेशेन्वेति तथाचशिष्यवृत्तिब्राह्मणसमानकालीनब्राह्मणत्ववान्गुरुरित्यन्वयधीः एवंपु
त्रवृत्तिस्पन्दनसमानकालीनस्पन्दनवान्पितेतिबोधः परेन्तुसहार्थः साहित्यंएकधर्ममात्रेत्वतीयार्थोवृत्तित्वंस
ह्यामात्रंवा साहित्यावच्छेदेनसर्वत्रविधेयान्वयः तथाचशिष्यवृत्तिसाहित्यवान्गुरुर्ब्राह्मणइत्यादिबोधइत्याहुः
एकेनापिसुपुत्रेणसिंहीस्वपितिनिर्भयम् सहैवदशभिःपुत्रैर्भारंवहतिगर्दभी । इत्यादौपुत्रेषुभारवाहनकर्तृत्वाभावेपिस
हप्रयोगेविद्यमानेत्यध्याहाराद्विद्यमानत्वसाहित्यंसहार्थः तथाचएककालीनत्वसम्बन्धेनदशपुत्रवृत्तिविद्यमानत्व
विशिष्टविद्यमानत्ववतीभारसमवेतत्वधात्वर्थतावच्छेदकाभिमतदेशप्राप्त्यनुकूलभारसमवेतवर्तमानक्रियानुकू
लकृतिमतीगर्दभीत्याकारकान्वयबोधः अतएवविद्यमानसहार्थेतृतीयेतिशाब्दिकाः धान्येनधनीमात्रेणगार्ग्यः
प्रकृत्याभिरूपइत्यादौतृतीयाऽभेदे तथाचधान्याभिन्नधनवान्गोत्राभिन्नगार्ग्यइत्यन्वयः साहजिकाभिन्नरमणीयता
वानित्यर्थः प्रकृतिपदस्यसाहजिकार्थकत्वात् अभिरूपपदस्यरमणीयतावदर्थकत्वादितिदिक् कर्मणायमभिप्रैतिस
सम्प्रदानमितिपाणिनिसूत्रम् तत्क्रियाकरणीभूतेनतत्क्रियाकर्मणायमभिप्रैतिफलभागित्वेनोद्देश्यीकरोतिसस
म्प्रदानमितिसूत्रार्थः करणीभूतकर्मजन्यफलभागित्वेनोद्देश्यत्वंसम्प्रदानत्वमितिफलितम् ग्रामंगच्छतीत्यत्रगमन

का॰वा॰ कर्मग्रामजन्यसंयोगादिभागित्वेनोद्देश्यस्य चैत्रादेस्तत्क्रियायां सम्प्रदानत्वाभावात् तद्वारणाय करणीभूतेति गमनक्रि
टी॰ यायां ग्रामस्याकारणत्वान्न दोषः दानादौ तु देयादिकं करणमिति प्रकृतसङ्गतिः स्वस्वामित्वादित्यागोद्देशेन कृतगो
५ दानादिस्थले दानजन्यफलभागित्वेनैव स्वस्वपित्रादिरुद्देश्यो न तु गोजन्यफलभागित्वेनेति न स्वस्वपित्रादेः सम्प्रदान
त्वम् अत एव पित्रे गां ददातीति न प्रयोगः यदि चाऽदृष्टद्वारा गोरपि जन्यत्वे फले दातुर्गोः स्वस्वपितृस्वर्गमुत्पादयिष्यतीति
१ चाभिसन्धिस्तदा फले कर्मजन्यत्वमदृष्टद्वारकं ग्राह्यम् अत एवमस्वस्मिन्स्वकर्तृकदानसम्प्रदानत्वापत्तिः नवाचैवमश्वे
ऽयं गां ददातीति प्रयोगप्रसङ्गः वस्तुतो धात्वर्थतावच्छेदकत्वेन फलं विशेष्यम् स्वस्वपितृस्वर्गादिकं तु न तथेति न दोषः इ
त्थं च विप्राय गां ददातीत्यादौ सम्बन्धित्वेन परेच्छाविषयत्वं चतुर्थ्यर्थः [illegible] यचैत्रो ग्रामं [illegible]
ख५ [illegible] गच्छतीत्यादिवारणाय परेति स च धात्वर्थतावच्छेदकफले वेति वृत्तित्वं द्वितीयार्थः तथा च विप्रसम्बन्धि
त्वेन परेच्छाविषयो वृत्तिस्वत्वध्वंसपूर्वकपरस्वत्वानुकूलत्यागानुकूलकृतिमानित्यन्वयधीः यत्र तु जन्यफलप्रकार
केच्छापूर्वकत्वं क्रियायां चतुर्थ्यर्थः युक्तं चैतच्चिप्याच्चतुरेकदेशजन्यत्वकर्मणो गवादेर्निरूपितत्वसम्बन्धेना
न्वयः तथा च विप्रविषयकगोनिरूपितजन्यतृप्तिफलप्रकारकेच्छापूर्वकत्यागो वृत्तिस्वस्वत्वध्वंसपरस्वत्वानुकूल
त्यागानुकूलकृतिमानित्यन्वयधीरिति तत्र गोजन्यफलस्य प्रकृते सुतरामपि न यथा विप्रविषयकत्यागो जन्यफलप्र
कारकेच्छानन्तर्भाविकत्वस्य दाने सम्भवात् तादृशेच्छाया एव दानत्वात् गौरवाच्चेति दिक् एवं हृदायोदकमासिञ्चती
त्यादौ संयोगावच्छिन्नद्रवद्रव्यक्रियावच्छिन्नव्यापारो धात्वर्थः वृत्तित्वेनेच्छाविषयत्वं चतुर्थ्यर्थः स च धात्वर्थतावच्छेद २

के संयोगेत्वेति ह्रतिवहूपद्वितीयार्थो विनाह शब्दस्य क्रियायामुत यावत्तहृतित्वेनैकविषयसंयोगानुकूलद्रव
व्यहृतिक्रियानुकूलव्यापारानुकूलकृतिमानित्यन्वयधीः अत्र क्रियान्वयस्य धात्वर्थत्वे हृतस्य कर्मत्वे स्यात्रतज्जलस्य क्रिया
याहृत्वापत्तयेवपरसमवेतत्वात् नचैवंपयसाहृत्वमासिद्धेतीत्यकर्मत्वेनस्यात् धात्वर्थतावच्छेदकक्रियायाहृत्वाहृति
त्वादितिवाच्यम् अत्र क्रियान्तस्यैव धात्वर्थतया धात्वर्थतावच्छेदकद्रवद्रव्यसंयोगस्यहृदहृतित्वात् द्रवद्रव्यसंयोगएवा
न्यथान्वये इतितन्नयुक्तम् तर्हि फलावच्छिन्नव्यापारबोधकतया धातोरकर्मकत्वं धात्वर्थतावच्छेदकफलशालित्वाभा
वाहृत्वादेरकर्मत्वंचस्यात् अजांग्रामंनयतीति वह्निकर्मकत्वंस्यादितिनाशङ्कनीयम् क्रियान्वार्थत्वेधात्वर्थतावच्छे
दकफलद्वयाभावान्नादृशक्रियानुकूलव्यापारार्थत्वेसंक्रियायामेवद्वितीयार्थहृतित्वान्वयात्क्रियावच्छेदकसंयोगेन्
हृत्वायेमादिचतुर्थ्यर्थेस्वोद्देश्यकत्वस्यैवान्वयोनद्वितीयार्थस्य कुमतित्वेविरोधात् चतुर्थीसमभिव्याहृतस्यैववह्निचिधातोः
स्तादृशव्यापारार्थत्वादतएवाजांग्रामंनयतीत्यत्रग्रामस्यनसम्प्रदानत्वम् अत्रहि संयोगावच्छिन्नक्रियानुकूलव्यापारः प्रे
रणादिधात्वर्थः द्वितीयार्थोहृतित्वेसंयोगेग्रामपदोत्तरद्वितीयार्थः क्रियायामजापदोत्तरद्वितीयार्थोत्वेतितन्नयैवमस्मन्मतेः
तादृशफलभागित्वेनग्रामादेरनुद्देश्यत्वान्नसम्प्रदानत्वम् तथोद्देश्यत्वविवक्षायांतुग्रामायाजांनयतीतिभवत्येवेति दि
क् परेतुस्वजन्मानद्रव्यस्वत्वभागित्वेनोद्देश्यत्वंसम्प्रदानत्वम् त्यागोनविलक्षणोग्राह्यः तेनविकर्षणादीके चादेर्नसम्प्रदान
त्वम् कर्मणादानकर्मणा यमभिप्रैतितत्सम्प्रदानमितिकर्मणेत्यादिसूत्रार्थः अतएवसम्प्रदीयतेऽस्मैइति संप्रदानसं
ज्ञापनत्वेव श्राद्धादावपिश्राद्धेनस्वत्वभागित्वेनोद्देश्यत्वम् किन्तुप्रीतिभागितयेतिसंप्रदानत्वाभावेनसम्प्रदानचतुर्थ्य

तत्र हन्त्रि फलपल्लवाद्युद्देश्यकसंयोगानुकूलोदकहननक्रियानुकूल
व्यापारानुकूलकृतिमान् ४

का·वा·
र·
१०

सम्प्रदानन्नमः स्वस्तीत्यादिना सूत्रान्तरेण तत्र चतुर्थी एवं च हन्त्रायोदकमासिञ्चतीत्यादौ हन्त्रादेः सम्प्रदानप्रयोगे गौणः
चतुर्थी प्राप्नोत्यर्थः अत एव शत्रवे स्वं मुञ्चति मित्राय हन्तं प्रेषयतीत्यादौ धात्वर्थतावच्छेदकफलभागित्वेनोद्देश्यत्वाभावेऽपि च
तुर्थी विभागानुकूलक्रियानुकूलव्यापारो मोचनम् संयोगानुकूलक्रियानुकूलव्यापारः प्रेषणमिति धात्वर्थतावच्छे
दकक्रियारूपफलजन्यफलशालित्वेन शत्रुमित्रयोरुद्देश्यत्वम् इत्थं चोदकादि[illegible]जन्यफलपल्लवोद्यस्त्रजन्यङ्कवा
दिहृतजन्यवाञ्छितान्नादिफलशालित्वेनोद्देश्यत्वमेव हन्त्रायेत्यादिचतुर्थ्यर्थः नच गुरुप्रीत्युद्देशेन गुरुपुत्राय पद
त्रायोगविगुरवे गां ददातीति स्यात् तथा विवक्षायामिष्टत्वात् अत एव रजकसम्बन्धितस्यतामर्थे विषये रजकस्य
वस्त्रं ददातीति प्रयोगः वस्त्रजन्यफलभागितयोद्देश्यत्वस्य तदैव रजकाय वस्त्रं ददातीत्येव भवितव्यम् नचैवं श्राद्धा
दावपि पित्रादेः प्रीतिभागितयोद्देश्यत्वात् गौणसम्प्रदानचतुर्थ्येवोपपत्तेर्नमः स्वस्तीत्यादिसूत्रान्तरं व्यर्थम् यत्कि
ञ्चित्क्रियाकर्मजन्यफलभागित्वेनोद्देश्यत्वस्यैव गौणसम्प्रदानत्वरूपत्वान्नमः पदार्थादेः क्रियान्वयाभावेन पृथक्सू
त्रप्रणयनात् नारदाय रोचते कलहः वैश्याय शतं धारयतीत्यादौ तु न नारदादेः सम्प्रदानत्वं किन्तु रुच्यर्थानां प्रीय
माणः धारेरुत्तमर्णः इति सूत्राभ्यां सम्बन्धमात्रे चतुर्थी तथा च चतुर्थ्यर्थसम्बन्धो धात्वर्थतावच्छिन्नाख्यातेन विषयताबो
ध्यत इति नारदस्य रुचिविषयः कलह इत्याद्यर्थः पुनर्दानमङ्गीकृत्य द्रव्यग्रहणं धारणम् वैश्यस्य शतकर्मकता
दृश ग्रहणाश्रयद्रव्यत्वमस्यार्थः सम्प्रदानस्य कारकत्वेन धात्वर्थतावच्छेदकस्वत्वनिष्पादकत्वेन ददेरेव सम्मतिप्रकाश
नेन दानेच्छामूलत्यागदानसम्पादनेनैवेति परे तु त्यागजन्यस्वत्वजनकस्वीकारवत्त्वं सम्प्रदानत्वम् श्राद्धादौ पित्रादेर्न
१०

मित्रहन्त्रि वाञ्छितान्नाद्यु
द्देश्यकसंयोगानुकू
लहननहन्त्रिक्रियानु
कूलव्यापारानुकूल
कृतिमान् ५

शत्रुहन्त्रि उःस्वाद्युद्देश्य
कविभागानुकूलह
न्त्रिक्रियानुकूलव्यापा
रानुकूलकृतिमान् ६

स्वीकारः वृक्षाय गां ददातीत्यादावपि गोः सम्प्रदानत्वमुद्देश्यत्वरूपमित्याहुः परकीयक्रियाजन्यविभागाश्रयत्वम
पादानत्वम् वृक्षात्पर्णं पततीत्यादौ पत्रादेरपादानत्ववारणाय परकीयेति अत्र पञ्चम्या विभागजनकत्वमन्योन्याभा
वप्रतियोगित्वं चार्थः विभागेऽन्योन्याभावे चाधिकरणत्वेन हेतोरन्वितिः तथा च वृक्षवृत्ति विभागजनकवृक्षभिन्नत्वमन्यो
न्याभावप्रतियोगितावच्छेदकपतनाश्रयः पत्रमिति वाक्यार्थः तथा च ध्रुवमपायेऽपादानमिति पाणिनिसूत्रम् अ
पाये विभागे ध्रुवं निश्चलं प्रकृतपञ्चम्यर्थविभागजनकत्वान्वयिक्रियाशून्यमिति तदर्थः धावतोऽश्वात्पततीत्यादावश्वा
देस्तद्विभागहेतुक्रियावत्वेऽपि प्रकृतपञ्चम्यर्थविभागजनकत्वान्वयिनी या पतनक्रिया तच्छून्यत्वमश्वादेरिति स्पन्दजन्यवि
भागाश्रयत्वेन वृक्षादेरपादानत्वे वृक्षात्पर्णं स्पन्दत इत्यपि स्यात् अतः क्रियेति क्रियापदं सकर्मकधात्वर्थपरम् व्या
द्विभेतीत्यादौ तु पञ्चम्या नापादानत्वं किं तु हेतुत्वम् अत्र वस्त्रं तेन धात्वर्थतानवच्छेदकत्वेन विभागो विशेष्यः तेन वृक्षं त्यज
ति विमानात्पततीत्यादौ वृक्षादेर्नापादानत्वं त्यजधात्वर्थविभागावच्छिन्नक्रियाया धात्वर्थतया विभागो विभागविशिष्टक्रियाजन्य
त्वाभावाच्च दोष इति तत्र तदर्थः संयोगावच्छिन्नक्रियायाः पतनार्थतया वृक्षात्पर्णं विभागेऽपि संयोगविशिष्टक्रि
याया अजनकत्वादसम्भवापत्तेः विभागे फलोपलक्षितव्यापारजन्यत्वं तत्र च तत्त्वमिति दिक् वृक्षाद्विभजते इ
त्यादौ विभागावधित्वमपादानत्वम् अवधित्वं स्वरूपसम्बन्धरूपं पञ्चम्यर्थः अपाये विभागे ध्रुवमवधिभूतमपा
दानमित्यपि पाणिनिसूत्रार्थः तथा च वृक्षनिष्ठावधितानिरूपकविभागाश्रयः पर्णमित्येकवाक्यार्थः न चैवं स्व
स्माद्विभजते इत्यपि स्यात् स्वप्रतियोगिकत्वविशिष्टसंयोगस्य स्वस्यावधिकत्वविशिष्टविभागस्यापि स्वस्मिन्नभावात्

का॰का॰
११

रस्येवापादानपदं पञ्चमीपदं च नानार्थमेव बोध्यम् यावतोऽस्यास्तन्नीत्यादाववधित्वमेव पञ्चम्यर्थः व्याघ्राद्बिभेति
शत्रोः पराजयत इत्यादौ पञ्चमी नापादाने किन्तु भीत्रार्थानां भयहेतुरिति सूत्रेणानुशिष्टहेतुत्वार्थिका धातोरर्थस्य यथा
यथेष्टं भयं भयाभावश्चार्थः पञ्चम्यर्थो हेतुत्वं धात्वर्थभये यथा तदर्थतावच्छेदके च भये न्वेति आश्रयत्वे व्यापारश्चार्थ यथा यथ
मा व्याप्नार्थः तथा च व्याघ्रहेतुकभयाश्रयः शत्रुहेतुकभयाभावानुकूलव्यापारवानित्यन्वयार्थः इत्येवं च हे
तुपञ्चम्येवोपपत्तौ इस्य कर्तृत्वे पञ्चम्यर्थो भिन्नेति बोध्यम् एवं कूपादन्धं वारयतीत्यादौ पञ्चम्या अवधित्वमर्थः संयोगानुकू
लक्रियारूपं पतनं द्वितीयायाः धात्वर्थप्रतिबन्धानुकूलव्यापारः तथा च कूपावधिकान्धवृत्तिरूपपतनप्रतिबन्धा
नुकूलव्यापारानुकूलकृतिमानिति वाक्यार्थः सं प्रघटते मचनेयुक्तः यत्र हि चित्रणावस्थापि निबिडकूपपरमावा
देशः संयोगोऽपि मानाभावेनास्तित्वान्तत्रासम्भवात् अत एव द्वितीयायाः पतनं पञ्चम्या धात्वर्थतावच्छेदकाभावान्व
यित्वमित्यन्वमधातोरभावानुकूलव्यापारः तथा च कूपवृत्तित्वपतनाभावानुकूलव्यापारविषयकयत्नवानिति वाक्या
र्थोऽपि न युक्तः यदन्धस्य पतनमप्रसिद्धं तत्रासम्भवात् किन्तु धातोरभावानुकूलव्यापारः पञ्चम्याश्चान्वितत्वम् द्विती
यायाः प्रतियोगित्वम् धात्वर्थतावच्छेदकीभूताभावान्वितमर्थः अभावश्च कूपादिसमभिव्याहारात् पतनादि
नात् जन्याधः संयोगादिना वा सम्बन्धेन बोध्यः तथा च पतनादिसम्बन्धेन कूपवृत्तित्वस्य प्रतियोगिकाभावानुकूल
व्यापारविषयकयत्नवानिति वाक्यार्थः एवमेतस्मात् सविषादन्नान्मित्रं वारयतीत्यादौ यत्र विषान्नस्य यान्मित्र
स्य च भोजनमप्रसिद्धं तत्रापि भोजनादिसम्बन्धेन सविषान्नवृत्तित्वमित्रप्रतियोगिकाभावानुकूलव्यापारविषय

११

कयत्नवानित्यन्वयधीः परेण कूपादश्वं वारयतीत्यत्र सविषादन्नान्मित्रं वारयतीत्यत्र च धातोः पतनमाद्ये
अवच्छिन्नत्वं पञ्चम्याः धातोर्द्वितीये भोजनम् अभावानुकूलव्यापारश्चोभयत्र पञ्चम्याः कर्मत्वम् उभयत्रहि
ते चार्थः द्वितीयायाः कर्तृत्वमर्थः धात्वर्थतावच्छेदकीभूताभावे धात्वर्थपतनादेरधिकरणत्वेन द्वितीयाव
च्छिन्नपञ्चम्यर्थावच्छिन्नत्वादि द्वितीयार्थकर्तृत्वोभयस्य च प्रतियोगित्वेनान्वयो व्युत्पत्तिवैचित्र्यात् एवं च पतनाधि
करणकूपावच्छिन्नत्वान्यकर्तृकत्वोभयप्रतियोगिकाभावानुकूलव्यापारविषयकयत्नवानित्याद्यस्य बो
जनसामान्ये सविषान्नकर्मकत्वमित्रकर्तृकत्वोभयप्रतियोगिकाभावानुकूलव्यापारविषयकयत्नवानिति द्विती
यस्यार्थः आकाशं न पश्यति घटमित्यादौ द्वितीयया विषयित्वं लक्षणया घटादिवृत्तित्वं द्वितीये च बोध्यते धात्वना
लौकिकविषयितावच्छिन्नचाक्षुषप्रत्यक्षत्वम् तत्रैव द्वितीयावच्छिन्नद्वितीयार्थान्वितनञर्थस्यान्वयः आख्यातस्य
तादृशोभयाभावान्वितनिरूपकत्वमर्थः तथा च लौकिकचाक्षुषप्रत्यक्षत्वसामान्ये य आकाशविषयित्वघटा
दिवृत्तित्वोभयाभावस्तन्निरूपको घटश्चार्थः आकाशादिविषयकचाक्षुषोपनीतभानेपि लौकिकविषयितावा
च्छेदेनाकाशविषयित्वे चैत्रवृत्तित्वोभयाभावसत्त्वान्न दोषः एवमन्यत्राप्रसिद्धस्थले बोध्यमित्याहुः हिमवतो गङ्गा
प्रभवतीत्यादौ पञ्चम्या हेतुत्वं धातोरुत्पत्तिरर्थः इति तु न युक्तम् तर्हि जनिकर्तुरित्यत एवोपपत्तौ भुवः प्रभव इति वै
यर्थ्यप्रसङ्गात् किन्तु प्रकर्षेण भवनं प्रभवनं प्रकाशः आद्यवह्निसंयोगरूपः स च धात्वर्थः वह्निपदार्थः प्रकृते
प्रावण्ये पञ्चम्यर्थः संयोगाद्यंशावच्छिन्नो नरस्तत्साहित्त्वमाख्यातार्थ आश्रयत्वम् तथा च हिमालयसंयोगाद्यं

का० वा० १२ 12

व्यवहितोत्तरत्वात् हिमाद्यपृथिवीसंयोगाश्रयत्ववती गङ्गेत्यर्थः वैकुण्ठात्काशीतो वा गङ्गा प्रभवतीत्यप्रयोगाद् अव्यवहिते
त्याद्येति च वैकुण्ठसंयोगध्वंसाव्यवहितोत्तरत्वाभावसमन्वयस्य काशीसंयोगध्वंसाव्यवहितोत्तरत्वाश्रयस्य तस्या
भावाददोषः वल्मीकाग्रात्प्रभवति धनुःखण्डमाखण्डलस्येत्यादावप्येवमेव तत्र बहिः पदार्थो वल्मीकाग्रोद्देशा
तिशेषः कृष्णात्पराजयते शिशुपालः अध्ययनात्पराजयते बाल इत्यादौ धातोरसहिष्णुतापञ्चम्याः कर्मत्वमाख्यात
स्याश्रयत्वमर्थः श्रीकृष्णं न सहते अध्ययनं न सहत इति विवरणात् असहिष्णुताद्वेषः अभिभवाशक्यत्वज्ञानमशक्य
त्वज्ञानं वा तथा च श्रीकृष्णविषयकाभिभवाशक्यत्वज्ञानवान् शिशुपालः कृष्णविषयकद्वेषवान्वेत्याद्यस्य अध्ययन
विषयकाशक्यत्वज्ञानवान्बाल इत्यन्तस्यार्थः विप्राद्धनमादत्ते चौर इत्यादौ पञ्चम्यापायपृथग्विनियोगोऽर्थो न तु स्वत्वम्
चौराद्धनमादत्त इत्यादौ चौरस्य स्वत्वाभावेन तदसम्भवात् धातोरपि पृथग्विनियोगफलकस्वीकारोऽर्थः न तु स्वत्व
जनकस्वीकारः विप्राद्धनमादत्ते चौर इत्यादौ तदसम्भवात् पञ्चम्यर्थस्य विनियोगोऽव्यवहितोत्तरत्वसम्बन्धेन धात्व
र्थतावच्छेदके विनियोगेऽन्वेति अव्यवहितोत्तरत्वं च स्वसमानविषयकपुरुषान्तरीयविनियोगाव्यवहितभिन्नत्वम्
तेन स्वद्रव्यं प्रतिगृहीता विप्रादत्ते धनमादाता तस्मादाददत इति न प्रयोगः इयं च विप्रपृथग्विनियोगाव्यवहि
तोत्तरत्वेनाहृत्य पृथग्विनियोगफलकस्वीकारवानित्यर्थः अधर्माज्जुगुप्सत इत्यत्र पञ्चम्यर्थः कर्मत्वम् धातोर्निन्दा
र्थः तथा चाधर्मं निन्दतीत्यर्थः अधर्माद्विरमत इत्यत्र धातोः करणानन्तरमकरणमर्थः पञ्चम्याः कर्मत्वमर्थः स च करणे
ऽकरणे चान्वेति तथा चाधर्मं कृत्वा पुनर्न करोतीत्यर्थः धर्मात्प्रमाद्यतीत्यादौ पञ्चम्या विषयित्वम् धातोरनवधानत्वम् १२

आख्यातस्याश्रयत्वमर्थः धर्मविषयकावधानाभावाश्रय इति वाक्यार्थः उपाध्यायादन्तर्धत्ते शिष्य इत्यादौ धातोः स्व
विषयकप्रत्यक्षविरोधिव्यापारः पञ्चम्याः सम्बन्धित्वे धात्वर्थतावच्छेदकप्रत्यक्षान्वितम् आख्यातस्य कृतिरर्थः न
याचोपाध्यायसम्बन्धिस्वविषयकप्रत्यक्षविरोधिव्यापारानुकूलकृतिमानिति वाक्यार्थः दण्डाद्घटः धूमाद्वह्निमा
नित्यादौ पञ्चमीनापादाने क्रियायोगाभावात् किंतु जनकत्वज्ञापकत्वरूपहेतुत्वे जन्यत्वज्ञाप्यत्वरूपहेतुमत्वे वा
हेतावितिसूत्रेणानुशिष्टा न चैवं जनिकर्तुः प्रकृतिरिति सूत्रवैयर्थ्यम् काष्ठात्पचतीत्यत्रवद्दण्डाज्जायत इत्यादावणु
त्पत्तिनिरूपितहेतुत्वार्थिकपञ्चम्या हेताविति सूत्रेणैव सम्भवादिति वाच्यम् उत्पत्तेः सहेतुत्वेपि सावधिकत्वव्यवहा
रादुत्पत्तिरूपधात्वर्थनिरूपितस्वरूपसम्बन्धस्य तस्य हेतुत्वानात्मकतया हेताविति सूत्रेण तदर्थकपञ्चम्या असम्भ
वादिति अधिकरणत्वं च न सम्बन्धः संयोगादिरूपसम्बन्धस्य हि निरूढत्वया वृद्धादेरपि कुण्डाद्याधारतापत्तेः न च स्वय
मेव सम्बन्धोधिकरणत्वं कुण्डादि क्वचन वृद्धादिधर्म इति वाच्यम् स्वधर्मत्वस्य स्वाधेयत्वरूपतया धेयत्वस्य च स्वनिष्ठाधिक
रणतानिरूपकत्वरूपत्वेनान्योन्याश्रयप्रसङ्गात् नाप्युत्पत्तये स्थितये च त्रमेयत्वापेक्षणीयमधिकरणम् उत्पत्तये पेक्ष
णीयं कार्यस्य समवायिकारणं स्थितये च घटादेर्भूतलादि त्रमेयज्ञानादेः समवायी समवायादेः स्वरूपसम्बन्धीति वा
च्यम् अपेक्षणीयस्य कारणतापत्तेः असमवायिकारणादावतिव्याप्तेः समवायिनि कारणत्वं घटत्वादेर्दीर्घत्वादौ न
सम्भवति नापि तद्भिन्नत्वे सत्यनप्रतिबन्धकसंयोगवत्त्वं त्वमधिकरणत्वम् ब्रह्माण्डादिधारकसंयोगाश्रयेश्व
वारणाय मतोऽन्यसमुपाते मूर्तमात्रस्य विलक्षणतन्संयोगादिमत्त्वे वा अत एव पङ्कजकोरकान्तरोपसन्नविनष्टभ्रमरस्या

अधिकरणोपदत्तनाप्रसिद्धावपिनाव्याप्तिः गुणादेस्तत्समवायित्वेसमवायादेस्तत्स्वरूपसम्बन्धित्वेवाक्षम अननुगमात्
सम्बन्धानानार्थत्वेचानाप्यत्वात् किन्तुप्रतियोगित्वादिवदधिकरणत्वमधिकरणमितिप्रतीतिसाक्षिकः स्वरूपसम्बन्ध
विशेषः पचातिरिक्तोऽनतिरिक्तोवेत्यन्यदेतत् एवमाधेयत्वमपि इत्थंचगृहेस्थाल्यामोदनंपचतीत्यादौपच्यर्थोयः
सत्तापत्त्यनुकूलोवह्निसंयोगानुकूलकाष्ठदानादिव्यापारः सएके पच्यर्थोविक्लित्यवच्छिन्नाग्नितण्डुलादिसंयोगएवफ
कत्वेनरूपमित्यादिव्यवहारादित्यन्ये उभयथापिगेहादेःसाक्षादनधिकरणत्वाभावात्कर्तृकर्मान्तरद्वाराक्रियाश्रय
त्वरूपाधिकरणत्वेसम्बन्धः तदाहुः कर्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियाम् उपकुर्वत्क्रियासिद्धौशास्त्रेऽधिक
रणंस्मृतम् वस्तुतःपरम्परयाक्रियाश्रयत्वेसम्बन्धः अतएवभाष्यकारेणस्थानदीपेदण्डादिनाकाष्ठादिचालनद्वारागृ
हस्थपाककरणेगृहस्यकर्तृद्वाराक्रियानाश्रयत्वेऽपिगृहेपचतीतिप्रयोगः वह्निचेष्टादेःसाक्षात्पाकगमनादिक्रि
याश्रयत्वेऽपिवह्नौपचतिचेत्रगच्छतीत्याद्यप्रयोगात्परम्पराघटितम् नचैवंक्रियाश्रयत्वस्यैवसम्बन्धेक्रियायोगंविना
भूतलेघटस्त्यादिप्रयोगोनस्यादितिवाच्यम् इष्टत्वात् नहिक्रियारहितेनास्तिसत्तेतिशाब्दिकाः वस्तुतोऽधिकरणत्व
मात्रमाधेयत्वमात्रंवासम्बन्धः क्रियांशस्यानुपलब्धत्वात् नचयत्क्रियायामन्वेतितन्निष्ठत्वंकारकत्वव्यवहारः अतए
भूतलेघटइतिक्रियाश्रूयमाणावाक्येऽध्याहृतबोधइतिनैयायिकाः अत्रभूतलनिष्ठाधिकरणतानिरूपकोघटइत्यन्वयबो
धः निष्ठत्वेनिरूपकत्वेचसंसर्गइतिप्राञ्चः एवंसतिनिरूपकत्वसम्बन्धस्यप्रतियोगितानवच्छेदकत्वाद्भूतलेनघटस्या
दौनन्वर्थानयामसम्भवात् आधेयत्वेसम्बन्धः तत्रचप्रकृत्यर्थस्यनिरूपकतयाप्रत्ययार्थस्याधिकरणतयाचान्वयेऽभूत

लनिरूपितत्वाद्येयत्वाश्रयोऽवयवत्वनपबोधः निरूपितत्वमाश्रयत्वे च सम्बन्धसंसर्ग इति नवाः चर्मणि द्वीपिनं हन्तीत्यादौ समम्य
र्थी निमित्तत्वे नञ्चोद्देश्यत्वं फलत्वेन फलवत्वेन चेच्छादिविषयत्वरूपं तथाहि मशकनिवृत्तौ धूमं करोतीत्यादौ मशक
निवृत्तेः फलत्वात् चर्मणि द्वीपिनं हन्तीत्यादौ चर्मादेः सिद्धतया स्वत्वरूपफलवत्वेनेच्छाविषयत्वात् तच्च प्रयोजनत्वेन
धात्वर्थत्वेनेति मशकनिवृत्तिविषयेच्छाप्रयोज्यारम्भकरणाश्रयः चर्मविषयकस्वत्वप्रकारकेच्छाप्रयोज्यद्वीपिकर्मक
हननानुकूलकृतिमानिति वाक्यार्थः एवं सौचिकपुष्कलकोऽहन्तः स्यादावपि पुष्कलको गन्धप्रसंग इति केशात् सा च नि
मित्तत्वकर्मयोगाद्यस्तत्तु शास्त्रनाद्यपि किञ्चित्कर्मप्रकारकबोधजनकधात्वनुयोगे प्रयुज्यते तादृशबोधजनकत्वात् सकर्मकस्य
धातोः कर्मबोधकपदयोगेन यथा द्वीपिनं हन्तीत्यादौ अकर्मकस्य तु कर्मविशिष्टमात्रता यथा प्रविशायां जनीदयेय
मुद्देतीत्यादौ उदेतीत्यस्योदयविशिष्टविरमाद्यर्थः हन्तीत्यर्थात् मणरजनीतयस्यसूर्योदयत्वस्यापि निमित्तत्वं तत्तानविषयत्वेनो
द्देश्यतया लोकानां रजनिदयत्वानाद्युमुदेतीत्यर्थ इत्येके एतर्हि पिहितियावद्रश्मिसंसर्गाभावविशिष्टस्य कालस्य र
जनित्वात् सूर्योदयेन तद्रश्म्युत्पादेन तत्प्रागभावनाशविशिष्टकालनाशाद्रजनितदेवेच्छाप्रयोज्यत्वे सूर्योदयेन तद्रश्म्य
भिसम्बन्धे शारदि पुष्पन्ति सप्तच्छदा इत्यत्रोत्पत्तिरपि समभ्यर्थः शारदुत्पत्तिकपुष्पाश्रयाः सप्तच्छदा इति वाक्यार्थः न
च शरदुत्पत्तिकपुष्पाश्रये चम्पकादावपि तथा प्रयोगः स्यादिति वाच्यम् सप्तच्छदस्य पुष्पाश्रयत्वे लक्ष्ये तत्प्रवृत्तिविषय
तया पुष्पस्यापि सप्तच्छदस्येति तत्त्वाभावादवच्छेदेन शारदुत्पत्तिकत्वस्य च व्याप्तत्वसिद्धत्वात् चम्पकादिपुष्पत्वावच्छेदेन
शारदुत्पत्तिकत्वाभावेन तथा प्रयोगाभावात् धातोरेव सप्तच्छदीयपुष्पत्वेन लक्षणेति केचित् सति सप्तम्याः सामाना
शारदुत्पत्तिकत्वस्य चम्पकपुष्पत्वसामानाधिकरण्येऽपि चम्पकपुष्पत्वावच्छिन्नत्वाभावात् ग्रीष्मोत्पत्तिकत्वस्यापि चम्पकपुष्पत्वसमानाधिकरण
त्वात् २

गोपतिष्ठकृतिजन्यव्यापारजन्यक्रियाजन्यपूर्वदेशविभागाश्रयाभिन्नगोविशेषणकर्मतानिविशेषणानापन्न ५

का॰वा॰
१५
14

धिकरणमर्थः गुणकर्मान्यत्वे सति सत्त्वादिमत्तो गुणकर्मान्यत्वसमानाधिकरणसत्त्ववोधनात् नचैवं त्रिकालिके
क्वचिद्देशिके तथात्वं समानकालीनत्वे पर्यवसन्नम् यथा गां दुग्धमाना स्नागतः अत्र समभ्यर्थे समानकालीनत्वे दोह
नमागमस्य न निरूपकत्वेनान्वयः महिष्यादिदोहनकालीनेतयागमयोगमभावात् नापि गोर्दोहनस्य गोदोहनधात्वोरु
पस्थितेः किन्त्वरण्ये गुरुषो गच्छतीत्यत्र यथा परंपरया गुरुरूपविशेषणानापन्नरण्यसमानकालीनत्वं गमनेभासते तथा
गोविशेषणकर्मतानिविशेषणानापन्नस्यैव दोहनस्य सत्येन च तादृशदोहनसमानकालीनागमनानुकूलकृतिमानितिधीः
दुग्धवानागतइत्यादौ तु न तथान्वयः आगमनकाले दोहनस्यातीतत्वपादोहनकालीनत्वस्यागमनेबाधात् किन्तु वर्तमा
नध्वंसप्रतियोगिदोहनकर्मसत्त्वोपस्थित्यधीत अतीतार्थताहशगोदोहनविशेषणप्रतियोगित्वविशेषणध्वंससमानका
लीनत्वमागमनेभासते तथा च तादृशवर्तमानध्वंसकालीनागमनानुकूलकृतिमानित्यन्वयबोधः एवं गां दुग्धवा
मागमिष्यति इत्यादावपि तादृशप्रतियोगित्वविशेषणप्रागभावस्य समानकालीनत्वं भासते नचसमभ्यर्थे समान
कालीनत्वं प्रकृतधात्वर्थस्य दोहनस्यान्वयापत्तिः तादृशदोहनकर्मत्वविशिष्टगोः स्वविशेषणकर्मत्वविशेषणदोहनाद्य
अयत्वसमन्वयेन कालेन्वयात् इदं तु बोध्यम् यस्य च भावेन भावलक्षणमितिसप्तम्यस्य यस्य क्रियया क्रियान्तरं लक्ष्यतेतत इतिव्या
ख्यानात् क्रिययोः सामानाधिकरण्ये सप्तमीत्यस्त्वेनावशिष्टेति गुणकर्मान्यत्वे सति सत्त्वादिमादौ न स्यात्तत्र गुणक
र्मान्यत्वे सति सत्त्वादिम्यभियुक्तप्रयोगादर्शनात् स्वतन्त्र्याख्यानयोर्भावक्रियापदे धर्मपरे तथा च यस्य च धर्मेण धर्मान्तरं निरू
प्यते तत्र सामानाधिकरण्येन प्रतिपाद्यते तत्र सप्तमीति सूत्रार्थ इत्यदोषः ॥ ॥ इति श्रीमन्महामहोपाध्यायश्रीजयरामविरचितः ॥

गोपतिष्ठकृतिजन्यवर्त
मानध्वंसप्रतियोगिदोह
नाश्रयाभिन्नगोर्विशेष
णकर्मतानिविशेषणाना
पन्नदोहनविशेषणप्र
तियोगित्वविशेषण

८

॥ कारकवादटिप्पणी ॥

५३१८